**DAV PUBLIC SCHOOLS, ODISHA ZONE-II**
**SAMPLE PAPER FOR ANNUAL EXAMINATION 2017-18**

**Std- VII** **F.M-80**
**Sub-Sanskrit** **Time-3hrs**

सामान्यनिर्देशाः -

प्रश्नपत्रे चत्वारः विभागाः सन्ति ।
सर्वे प्रश्नाः अनिवार्याः सन्ति ।
उत्तरपुस्तिकायां प्रश्नसंख्या अवश्यं लेखनीया ।
उत्तरपुस्तिकायां विभागानुसारम् उत्तराणि लेखनीयानि ।
उत्तराणि निर्देशानुसारं संस्कृतभाषया एव लेखनीयानि ।

क-विभागः (पठित-अववोधनम्) (30अंकाः)

न. १. अधोलिखतं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - [6]

एकः चित्रकारः आसीत् । चित्रनिर्माणे तस्य अतीव रुचिः आसीत्। यत्र-यत्र सः शोभनानि दृश्यानि पश्यति स्म तत्र-तत्र सः चित्रनिर्माणं करोति स्म। एकदा सः नगराद् वहिः अगच्छत्। तत्र पर्वतानां पृष्ठात् सूर्यस्य स्वर्णरश्मयः वातावरणं स्वर्णमयं कुर्वन्ति स्म। एतत् शोभनं दृश्यं दृष्ट्वा सः पर्वतप्रदेशम् आरुह्य चित्रनिर्माणं प्रारभत। यदा चित्रं पूर्णम् अभवत् तदा सः कदाचित् वामतः, कदाचित् दक्षिणतः अनेकवारं चित्रम् अपश्यत्। तस्मिन् लीनः सः स्वस्थितिं विस्मृतवान्।

(क) एक पदेन उत्तरत - (1/2 x 4 = 2)

(I) कलाकारस्य रुचिः कस्मिन् आसीत् ? (II) चित्रकारः कतिवारं चित्रम् अपश्यत् ?

(III) चित्रकारः कुत्र आरुह्य चित्रनिर्माणम् आरभत ? (IV) एकदा चित्रकरः कुत्र अगच्छत् ?

(ख) वाक्येन उत्तरत - (1 x 2 = 2)

(I) कदा चित्रकारः चित्रं पुनः पुनः अपश्यत् ? (II) के वातावरणं स्वर्णमयं कुर्वन्ति स्म ?

(ग) निर्देशानुसारम् उत्तरत - (1/2 x 4 = 2)

(I) अनुच्छेदे 'कुर्वन्ति स्म'इति क्रियापदस्य कर्त्तृपदं किम् ? (क) सूर्यस्य (ख) वातावरणम् (ग)स्वर्णरश्मयः

(II) दृश्यानि पदस्य विशेषणपदं किम् ? (क) पश्यति (ख) शोभनानि (ग) दृश्यानि

(III) दृष्ट्वा इति पदे कः प्रत्ययः ? (क) ल्यप् (ख) तुमुन् (ग) क्त्वा

(IV) एकवारम् इत्यस्य किम् विलोमपदम् अत्र प्रयुक्तम् ? (क) कदाचित् (ख) एकदा (ग) अनेकवारम्

न. २. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत - [6]

विद्या ददाति विनयं विनयात् याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद् धर्मः ततः सुखम् ।।

(क) एकपदेन उत्तरत - (1/2 x 4 = 2)

(I) विद्या किं ददाति ? (II) धर्मः कस्मात् भवति ?

(III) पात्रत्वात् किम् आप्नोति ? (IV) कस्मात् पात्रतां याति ?

(ख) वाक्येन उत्तरत - (1 x 2 = 2)

(I) सुखं कस्मात् प्राप्यते ? (II) सर्वेषां मूलं किम् ?

(ग) यथानिर्देशम् उत्तरत - (1/2 x 4 = 2)

(I) धनात् पदे का विभक्तिः प्रयुक्ता ? (क) पञ्चमी (ख) षष्ठी (ग) चतुर्थी

(II) श्लोके यच्छति पदस्य स्थाने किं पदम् प्रयुक्तम् ? (क) याति (ख) ददाति (ग) आप्नोति

(III) विद्या पदे किं लिङ्गं प्रयुक्तम् ? (क) पुलिङ्गं (ख) स्त्रीलिङ्गं (ग) नपुंसकलिङ्गं

(IV) श्लोके आयाति पदस्य किं विपरीतपदं प्रयुक्तम् ? (क) ददाति (ख) आप्नोति (ग) याति

न.३. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-[6]

(कच्छपः मत्स्यजीविनां वार्त्तां श्रुत्वा भयभीतः च भूत्वा हंसयोः समीपं गच्छति )

कच्छपः- मित्रे ! मत्स्यजीविनः श्वः आगत्य मां बद्ध्वा नेष्यन्ति। भवन्तौ मम सहायतां कुरुताम्।

हंसौ- आवां कथं सहायतां करवाव ?

कच्छपः- भवन्तौ माम् आकाशमार्गेण अन्यत्र नयताम्।

एकः हंसः– (चिन्तयित्वा) आवां काष्ठस्य सहायतया भवन्तम् अन्यत्र नेष्यावः। आवां भवतः सहायतां करिष्यावः परं भवान् मार्गे किमपि न वदिष्यति।

कच्छपः- आम् शोभनम्।

हंसौ- आगच्छतु, एतं लगुडं धारयतु।

(हंसौ कच्छपं लगुडेन धृत्वा आकाशे उदपतताम्)

(क) एकपदेन उत्तरत- (1/2 x 4 = 2)

(I) कच्छपः केषां वार्त्तां श्रुत्वा भयभीतः अभवत् ? (II) हंसौ कच्छपं केन धृत्वा उदपतताम् ?

(III) के श्वः आगत्य कच्छपं बद्ध्वा नेष्यन्ति ? (IV हंसौ कस्य सहायतया कच्छपं नेष्यतः ?

(ख) वाक्येन उत्तरत - (1x 2 = 2)

(I) कच्छपः भयभीतः भूत्वा कयोः समीपं गच्छति ?

(II) हंसौ कच्छपं लगुडेन धृत्वा कुत्र उदपतताम् ?

(ग) निर्देशानुसारम् उत्तरत - (1/2 x 4 = 2)

(I) "करवाव" इति क्रियापदस्य मूलधातुः कः ?

(I) क्री (II) कृ (III) क्रीड् (IV) कर

(II) "मम" इति पदस्य मूलशब्दः कः ?

(I) अस्मद् (II) युष्मद् (III) तत् (IV) एतत्

(III) "नेष्यन्ति" इति क्रियापदे कः लकारः ?

(I) लट् (II) लङ् (III) लोट् (IV) लृट्

(IV) "उदपतताम्" इति पदे कः उपसर्गः ?

(I) उद (II) उत् (III) पत् (IV) ताम्

न.४. श्लोकं पठित्वा मंजूषायाः आधारेण अन्वयं पूरयत- (0.5 x 8 = 4)

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय।।

**अन्वयः**- खलस्य (I) __________ विवादाय, धनं (II)_________ शक्तिः परेषां (III) ____________ ।साधोः एतत् (IV)____________ ज्ञानाय, दानाय, रक्षणाय च। **मंजूषा**-(मदाय, विपरीतं, विद्या, परिपीडनाय)

यथैकेन न हस्तेन तालिका सम्प्रदद्यते ।
तथोद्यमं परित्यज्य न फलं कर्मणः भवेत् ।।

**अन्वयः** - यथा (I) _______ हस्तेन तालिका (II) _______ सम्प्रदद्यते, तथा (III) ________ परित्यज्य कर्मणः (IV) _______ न भवेत् । **मञ्जूषा** – (न, फलं, एकेन, उद्यमम् )

न.५. रेखाङ्कितपदमाधृत्य प्रश्नवाक्यानि लिखत- (1x 4 = 4)

(क) वृक्षाणां मूलानि <u>पृथिव्यां</u> भवन्ति।

(ख) <u>साधोः</u> विद्या ज्ञानाय भवति।

(ग) <u>काकी</u> हारम् अनयत्।

(घ) कच्छपः <u>हंसौ</u> अकथयत्।

न.६.शव्दानाम् अर्थैः सह उचित मेलनं कृत्वा लिखत- (1 x 4 = 4)

| "क" | " ख" |
|---|---|
| प्रज्ञा | नीत्वा |
| मदाय | चक्षुः |
| लोचनम् | बुद्धिः |
| गृहीत्वा | अभिमानाय |

## ख-विभागः (अपठित-अवबोधनम्)

न .७. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत- [5]

बाल्ये जीवननिर्माणाय सदुपदेशः आवश्यकः। बाल्यकालः एव उपदेशस्य उचितकालः भवति । बाल्यकाले बालकानां बालिकानां च मनांसि कोमलानि बाह्य-प्रभाव-शून्यानि च भवन्ति। अतः तेषां कृते शिक्षायाः उपदेशस्य च कालः भवति। बाल्यकाले बालः यद् पश्यति तदेव अनुकरोति शिक्षयति च ।

(क) एकपदेन उत्तरत- (1/2 x 2 = 1)

(I) सदुपदेशः किमर्थम् आवश्यकः ? (II) कः समयः उपदेशग्रहणस्य उचितकालः अस्ति ?

(ख) पूर्णवाक्येन उत्तरत- (1 x 2 = 2)

(I) बाल्ये बालकानां बालिकानां च मनांसि कीदृशानि भवन्ति ?

(II) कदा बालः अनुकरणप्रियः भवति ?

(ग) निर्देशानुसारम् उत्तरत- (1/2 x 4 = 2)

(I) "अन्तः" अस्य किं विलोमपदम् अत्र प्रयुक्तम् ? (I) वाह्य (II) कालः (III) बालः

(II) "मनांसि" अस्य किं विशेषणपदम् अत्र प्रयुक्तम् ? (I) बालकानां (II) बालिकानां (III) कोमलानि ?

(III) "बालः" अस्य किं क्रियापदम् अत्र प्रयुक्तम् ? (I) भवति (II) पश्यति (III) भवन्ति

(IV) "शिक्षायाः" अस्मिन् पदे का विभक्तिः ? (I) पंचमी (II) षष्ठी (III) सप्तमी

## ग-विभागः (व्याकरणकार्यम्) (३०)

न .८. सन्धिं विच्छेदं वा कुरुत - (1 x 3 = 3)

(क) __________ + इन्द्रः = राजेन्द्रः

(ख) देव + ऐश्वर्यम् = ____________ ।

(ग) गुरु + ____________ = गुर्वाश्रमः

न .९. मञ्जूषायां प्रदत्त-अव्ययपदैः रिक्तस्थानानि पूरयत- (1 x 3 = 3)

(क) वृक्षस्य ________ गावः चरन्ति।

(ख) कक्षायाः ________ मा गच्छ ।

(ग) अविचार्य कर्म _______ कर्तव्यम्।

मञ्जूषा-(बहिः, न, अधः, अधुना)

न .१०. उचितवर्णैः रिक्तस्थानानि पूरयत- (0.5 x 6 = 3)

(क) प्रसन्नः = प् + ____+ अ + स् + अ + न् + _____ + अः

(ख) कुर्वन्ति = क् + उ + _____+ व् + अ + न् +______+ इ

(ग) कण्ठः = क् +____ + _____+ ठ् + अः

न .११. उचितसंख्याशब्दैः रिक्तस्थानानि पूरयत- (1 x 3 = 3)

(क) __________ मृगाः वनं प्रति धावन्ति । (४)

(ख) शिवस्य ____________ नेत्राणि सन्ति । (३)

(ग) सभायां ____________ जनाः सन्ति । (३०)

न .१२. उचितशब्दरूपैः रिक्तस्थानानि पूरयत- (1/2 x 8 = 4)

(क) तस्यां _______ नौका चलति । (नदीम्, नद्यां, नद्याः)

(ख) जनकः _________ पाठयति । (पुत्रेण, पुत्रम्, पुत्रस्य )

(ग) शिष्याः _______ सह तिष्ठन्ति । (मुनिभिः, मुनेः,मुनीनाम्)

(घ) वने ________ इतस्ततः भ्रमन्ति। (जन्तुवः, जन्तुः, जन्तवः)

(ङ) छात्राः ______ बहिः आगच्छन्ति। (कक्षाम्, कक्षायाः, कक्षा)

(च) मनुष्यः ________ कार्यं करोति। (मतिः, मतीः, मत्या)

(छ) माता ________ भोजनम् यच्छति। (कन्याम्, कन्यायाः, कन्यायै)

(ज) पिता _____ क्रीडनकम् आनयति। (पुत्राय, पुत्रस्य, पुत्रम्)

न .१३.उचितधातुरूपैः रिक्तस्थानानि पूरयत- (1/2 x 8 = 4)

(क) त्वं मन्दिरं कदा ___________ । (गमिष्यति, गमिष्यसि, गमिष्यामि)

(ख) दशरथस्य चत्वारः पुत्राः _____ । (आसीत्, आस्ताम्, आसन्)

(ग) मुनयः शिष्यै सह आश्रमे ______ । (तिष्ठति, तिष्ठतः, तिष्ठन्ति)

(घ) त्वं सर्वदा शुद्धं जलं ________ । (पिबेत, पिबेत् , पिबेयुः)

(ङ) श्वः मम परीक्षा ___________ । (अभवत्, भविष्यति, भवेयुः)

(च) बालकाः संस्कृतम् __________ । (अपठत्, अपठताम्, अपठन्)

(छ) त्वं सैनिकः _______________ । (अस्ति, असि, अस्मि)

(ज) श्रमिकाः ध्यानेन कार्यं ________ । (करोतु, कुरुताम्, कुर्वन्तु)

न .१४. रेखाङ्कितपदानां सकारणं विभक्तिं च निरूपयत- (1 x 4 = 4)

(क) विद्यायाः विना जीवनं व्यर्थम् ।
(ख) तस्मै श्रीगुरवे नमः ।
(ग) माता पुत्रेषु अतीव स्निह्यति ।
(घ) वृक्षणां अधः धेनुः चरति ।

न .१५. उपसर्गान् पृथक्कृत्वा लिखत - (1 x 3 = 3)

(क) प्रगतिः- (ख) उत्थानम्- (ग) संस्कृतम्- (घ) विस्मृतवान्-

न .१६. प्रकृतिप्रत्ययैः शून्यस्थानं पूरयत - (1 x 3 = 3)

(क) दृश् + क्तवतु = ______
(ख) _____ + शतृ = स्मरन्
(ग) _____ + क्त = पीतम्

## घ-विभागः (रचनात्मककार्यम्) (१५)

न .१७. एकस्मिन् विषये पञ्चभिः: वाक्यैः एकम् अनुच्छेदं लिखत- (1 x 5 = 5)

"पर्यावरणम्" अथवा "मम उद्यानम्"

न .१८. चित्रं दृष्ट्वा मंजूषाप्रदतशब्दानां सहायतया पञ्चवाक्यानि लिखत । (1 x 5 = 5)




मञ्जूषा-(जन्तुशाला, वृक्षाः, जना, गजः, मकरः, सुन्दरम्, प्रसन्नाः, सिंहः, जले, पञ्जरे, जन्तवः, व्याघ्रः, )

न .१९.मञ्जूषायां प्रदत्तशब्दानां सहायतया संवादं पूरयत । (1 x 5 = 5)

दिव्यांशुः - सुरेश! (१) _________अधुना कुत्र गच्छसि ?
सुरेशः - अहम् तु आपणं गच्छामि ।
दिव्यांशुः - त्वं (२) _______आपणं गच्छसि ?
सुरेशः - अहं (३) ______ आनेतुम् आपणं गच्छामि । त्वम् कुत्र गच्छसि ?
दिव्यांशुः - अहं (४)______ क्रीडाक्षेत्रं गच्छामि।
सुरेशः - अहम् अपि क्रीडितुम् (५)______ ।
(मञ्जूषा - किमर्थम्, इच्छामि, मिष्ठान्नम्, त्वम्, खेलितुम्)

* 